बद्धगुदोदरस्य निदानपूर्व्विका सम्प्राप्तिर्यथा,
"पक्ष्मवालैः सहान्नेन भुक्तैर्बद्धायने गुदे।
उदावर्त्तैस्तथार्शोभिरान्त्रसंमूर्च्छनेन वा॥
अपानो मार्गसंरोधाद्धात्वग्निं कुपितोऽनिलः।
वर्च्चःपित्तकफान् रुद्धा जनयत्युदरं ततः"॥

अस्य रूपाणि।

"तृष्णा-दाह-ज्वर-मुख-तालु-शोषोरुसाद-कास-श्वास-दौर्ब्बल्यारोचकाविपाक-वर्च्चोमूत्र-सङ्गाध्मान-च्छर्द्दि-क्षवथु-शिरोहृन्नाभि-गुदशूलान्यपि चोदरं मूढ़वातं स्थिरमरुणं नीलराजिशिरावनद्धं सराजिकं वा प्रायो नाभ्युपरि गोपुच्छवदभिनिर्वर्त्तत इत्येतद् बद्धगुदोदरं विद्यात्"॥

छिद्रोदरस्य निदानपूर्व्विका सम्प्राप्तिर्यथा,
"शर्करा-तृणकाष्ठास्थि-कण्टकैरन्नसंयुतैः।
भिद्येतान्त्रं यदा भुक्तैर्जृम्भयात्यशनेन वा।
इयात् पाकरसस्तेभ्यश्छिद्रेभ्यः प्रस्रवद्वहिः।
पूरयन् गुदमन्त्रञ्च जनयत्युदरं ततः"॥

अस्य रूपाणि।

"इति तदधोनाभ्याः प्रायोऽभिनिवर्त्तमानमुदकोदरस्य च यथाबलञ्च दोषाणां रूपाणि दर्शयत्यपि चातुरः सलोहित-नील-पीत-पिच्छिल-कुणप-गन्धामवर्चं उपवेशते हिक्का-श्वास-कास-तृष्णा-प्रमेहा-रोचकाविपाक-दौर्ब्बल्यपरीतश्च भवत्येतत् छिद्रोदरं विद्यात्"॥

जलोदरस्य निदानपूर्व्विका सम्प्राप्तिर्यथा,—
"स्नेहपीतस्य मन्दाग्नेः क्षीणस्यातिकृशस्य वा।
अत्यम्बुपानान्नष्टेऽग्नौ मारुतः क्लोम्नि संस्थितः॥
स्रोतःसु रुद्धमार्गेषु कफश्चोदकमूर्च्छितः।
वर्द्धयेतां तदेवाम्बु स्वस्थानादुदराय तौ"॥

अस्य रूपाणि।

"तस्य रूपाण्यनन्नकाङ्क्षापिपासा-गुदस्राव-शूल-श्वास-कास-दौर्ब्बल्याण्यपि चोदरं नानावर्णराजिभिरासन्ततमुदकपूर्णदृतिक्षोभसंस्पर्शं भवत्येतदुदकोदरं विद्यात्"॥

एषां साध्यत्वासाध्यत्वादिलक्षणं यथा,—
"तत्राचिरोत्पन्नमनुपद्रवमनुदकप्राप्तमुदरं त्वरमाणश्चिकित्सेदुपेक्षितानां ह्येषां दोषाः स्वस्थानदपहृत्ता अपरिपाकाद्द्रवीभूताः सन्धीन् स्रोतांसि चोपक्लेदयन् स्वेदश्च वाह्येषु स्रोतःसु प्रतिहतगतिस्तिर्य्यगवतिष्ठमानस्तदेवोदकमाप्याययति"।

तत्र पिच्छोत्पत्तौ मण्डलमुदरं गुरुस्तिमितमाकोचितमशब्दं मृदुस्पर्शमपगतराजीकमाक्रान्तं नाभ्यां सर्पतीति। ततोऽनन्तरं उदकप्रादुर्भावः॥

तस्य रूपाणि कुक्षेरतिमात्रवृद्धिः शिरान्तर्धानगमनमुदकपूर्णदृतिसमक्षोभस्पर्शत्वञ्च।

तदातुरमुपद्रवाः स्पृशन्ति छर्द्यतीसार-तमक-तृष्णा-श्वास-कास-हिक्का-दौर्ब्बल्य-पार्श्वशूलारुचि-स्वरभेद-मूत्रसङ्गादयस्तथाविधमचिकित्स्यं विद्यादिति॥ भवति चात्र,—

"वातात् पित्तात् कफात् प्लीह्नः सन्निपातात्तथोदकात्।
परस्परं कृच्छ्रतरमुदरं भिषगादिशेत्॥
पक्षाद्बद्धगुदन्तूर्द्ध्वं सर्व्वं जातोदकन्तथा।
प्रायो भवत्यभावाय छिद्रान्त्रञ्चोदरं नृणाम्"॥
"श्वयथुः सर्व्वमर्म्मोत्थः श्वासो हिक्कारुचिः सतृट्।
मूर्च्छाच्छर्द्द्यतिसारश्च निहन्त्युदरिणं नरम्"॥

जललक्षणमाह।

"अशोथमरुणाभासं सशब्दं नातिभारिकम्।
सदा गुड़गुड़ायान्तं शिराजालगवाक्षितम्॥
नाभिं विष्टभ्य पायौ तु वेगं कृत्वा प्रणश्यति॥
हृन्नाभिवंक्षणकटीगुदप्रत्येकशूलिनः॥
कर्कशं सृजतो वातं नातिमन्दे च पावके॥
मूत्रेऽल्पे संहृते दोषे लालया विरसे मुखे।
अजातोदकमित्येतैर्लिङ्गैर्विज्ञाय तत्त्वतः"॥

अतःपरं वातजादिभेदेन चिकित्साविधानं यथा,
"उपक्रामेद्भिषग्दोषबलकालविशेषवित्।
वातोदरे बलवतः पूर्व्वं स्नेहैरुपाचरेत्॥
स्निग्धाय स्वेदिताङ्गाय दद्यात् स्नेहविरेचनम्॥
हृते दोषे परिम्लानं वेष्टयेद्वाससोदरम्॥
तथास्यानवकाशत्वाद्वायुर्नाध्मापयेत् पुनः।
दोषातिमात्रोपचयात् स्रोतसां सन्निरोधनात्॥
सम्भवन्त्युदराण्येवं अतो नित्यं विशोधयेत्।
शुद्धं संसृज्य च क्षीरं बलार्थं पाययेत्तु तम्॥
प्रागुत्क्लेशान्निवर्त्त्यञ्च बले लब्धे क्रमात् पयः।
यूषैरसर्व्वा मन्दाम्ललवणैः रोधितानलम्॥
सोदावर्त्तं पुनः स्निग्धं स्विन्नमास्थापयेन्नरम्।
स्फुरणाक्षेपसन्ध्यस्थिपार्श्वपृष्ठत्रिकास्थिषु।
दीप्ताग्निबद्धविड्वातं रूक्षमप्यनुवासयेत्॥
तीक्ष्णाधोभागयुक्तः स्यान्निरूहो दाशमूलिकः।
वातघ्नाम्लशृतैरण्डतिलतैलानुवासनः॥
अविरेच्यन्तु यं विद्याद्दुर्ब्बलं स्थविरं शिशुम्।
सुकुमारं प्रकृत्याल्पदोषं वाथोल्बणानिलम्॥
तं भिषक् शमनैः सर्पिर्यूषमांसरसौदनैः।
वस्त्यभ्यङ्गानुवासैश्च क्षीरैश्चोपाचरेद्बुधः॥ १॥
पित्तोदरे तु बलिनं पूर्व्वमेव विरेचयेत्।
दुर्ब्बलन्त्वनुवास्यादौ शोधयेत् क्षीरवस्तिना॥
सञ्जातबलकायाग्निं पुनः स्निग्धं विरेचयेत्।
पयसा सत्रिवृत्कल्केनोरुवूकशृतेन वा॥
शातलात्रायमाणाभ्यां शृतेनारग्वधेन वा।
सकफे वा समूत्रेण सवाते तिक्तसर्पिषा॥
पुनः क्षीरप्रयोगश्च वस्तिकर्म्मविरेचनम्।
क्रमेण ध्रुवमातिष्ठन् युक्तः पित्तोदरं जयेत्॥
स्निग्धं स्विन्नं विशुद्धन्तु कफोदरिणमातुरम्।
संसर्ज्जयेत् कटुक्षारयुक्तैरन्नैः कफापहैः॥
गोमूत्रारिष्टपानैश्च चूर्णायस्कृतिभिस्तथा।
सक्षारैस्तैलपानैश्च समयेत्तु कफोदरम्॥
सन्निपातोदरे सर्व्वा यथोक्ताः कारयेत् क्रियाः।
सोपद्रवन्तु निर्वृत्तं प्रत्याख्येयं विजानता॥
उदावर्त्तरुगानाहैर्दाहमोहतृषाज्वरैः।
गौरवारुचिकाठिन्यैश्चानिलादीन् यथाक्रमम्॥
लिङ्गैः प्लीहोदरान् दृष्ट्वा रक्तं वापि स्वलक्षणैः।
चिकित्सां संप्रकुर्व्वीत यथादोषं यथाबलम्॥
स्नेहं स्वेदं विरेकञ्च निरूहमनुवासनम्।
समीक्ष्य कारयेद्बाहौ वामे वा व्यधयेत्सिराम्॥
षट्पलं वा पिबेत्सर्पिः पिप्पलीर्व्वा प्रयोजयेत्।
सगुड़ामभयां वापि क्षारारिष्टगणांस्तथा॥
रोहितकलतानान्तु काण्डैका साभया जले।
मूत्रे वा शृतमेतञ्च सप्तरात्रस्थितं पिबेत्॥
कामलागुल्ममेहार्शःप्लीहसर्व्वोदरक्रिमीन्।
तद्धन्याज्जाङ्गलरसैर्जीर्णे स्याच्चात्र भोजनम्॥
अग्निकर्म्म च कुर्व्वीत भिषग्वातकफोल्बणे।
पैत्तिके जीवनीयानि सर्पींषि क्षीरवस्तयः॥
रक्तावसेकः संशुद्धिः क्षीरपानञ्च शस्यते।
यूषैर्मांसरसैश्चापि दीपनीयसमायुतैः॥
लघून्यन्नानि संसृज्य भजेत् प्लीहोदरी नरः॥
स्विन्नाय बद्धोदरिणे मूत्रतीक्ष्णौषधान्वितम्।
सतैललवणं दद्यान्निरूहं सानुवासनम्॥
परिस्रंसीनि चान्नानि तीक्ष्णञ्चैव विरेचनम्।
उदावर्त्तहरं कर्म्म कार्य्यं वातघ्नमेव च॥
छिद्रोदरमृते स्वेदात् श्लेष्मोदरवदाचरेत्॥
जातं जातं जलं स्राव्यमेवं तत्पातयेद्भिषक्"॥

अरिष्टलक्षणं यथा।

"तृष्णाकासज्वरार्त्तन्तु क्षीणमांसाग्निभोजनम्।
वर्ज्जयेत् श्वासिनं तद्वत् शूलिनं दुर्ब्बलेन्द्रियम्"॥
"द्रवेभ्यश्चोदकादिभ्यो नियच्छेदनुपूर्व्वशः।
सर्व्वमेवोदरं प्रायो दोषसंघातजं मतम्।
तस्मात्त्रिदोषशमनीं क्रियां सर्व्वषु कारयेत्"॥

पथ्यनियमो यथा :

"दोषैः कुक्षौ हि संपूर्णे वह्निर्मन्दत्वमृच्छति।
तस्माद्भोज्यानि योज्यानि दीपनानि लघूनि च॥
रक्तशालीन् यवान् मुद्गान् जाङ्गलांश्च मृगद्विजान्।
पयोमूत्रासवारिष्टान्मधुशीधूंस्तथा सुराम्॥
यवागूमोदनं वापि यूषैरद्याद्रसैरपि।
मन्दाम्लस्नेहकटुभिर्यञ्च मूलोपसाधितैः"॥

अपथ्यानि यथा।

"औदकानूपजं मांसं शाकं पिष्टकृतं तिलान्।
व्यायामाध्वदिवास्वप्नं यानयानञ्च वर्ज्जयेत्॥
तथोष्णलवणाम्लानि विदाहीनि गुरूणि च।
नाद्यादन्नानि जठरी तोयपानञ्च वर्ज्जयेत्"॥

वातजादिभेदेन तक्रपाननियमो यथा।

"वातोदरी पिबेत्तक्रं पिप्पलीलवणान्वितम्।
शर्करामधुकोपेतं स्वादु पित्तोदरी पिबेत्॥
यमानीसैन्धवाजाजीव्योषयुक्तं कफोदरी।
पिबेन्मधुयुतं तक्रं व्यक्ताम्लं नातिपेलवम्॥
मधुतैलवचाशुण्ठीशताह्वाकुष्ठसैन्धवैः।
युक्तं प्लीहोदरार्त्तस्तु सव्योषन्तु दकोदरी॥
बद्धोदरी तु हपुषायवान्यजाजीसैन्धवैः।
पिबेच्छिद्रोदरी तक्रं पिप्पलीक्षौद्रसंयुतम्॥
"देवदारुपलाशार्कहस्तिपिप्पलीशिग्रुकैः।
साश्वगन्धैः सगोमूत्रैः प्रदिह्यादुदरं समैः॥
पलाशं कत्तृणं रास्ना तद्वत्पक्वावसेचयेत्।
मूत्राण्यष्टावुदरिणां सेके पाने च योजयेत्॥
रूक्षाणां बहुवातानां तथा संशोधनार्थिनाम्।
दीपनीयानि सर्पींषि जठरघ्नानि वक्ष्यते॥
पिप्पलीपिप्पलीमूलचव्यचित्रकनागरैः।
सक्षारैरर्द्धपलिकैर्द्विःप्रस्थं सर्पिषः पचेत्॥
कल्कैर्द्विपञ्चमूलस्य तुलार्द्धस्य रसेन च॥